कलिर्नाभीदेशे विजयमथ पुच्छे च जगदुः
शरीरे भद्रायाः पृथगिति फलं सर्व्वमुनयः ॥”

मनुवसुमुनितिथियुगदशशिवगुणसंख्यासु तिथिषु पूर्व्वार्द्धाख्यम्। आयाति विष्टिरेषा पृष्ठे शुभदा पुरस्त्वशुभा ॥ चतुर्द्दश्यादिषु पूर्व्वाशादिमुखं भवतीत्यर्थः। इति ज्योतिस्तत्त्वम् ॥

भद्राकरणं, क्ली, (भद्र+डाच्। कृ+ल्युट्।) मुण्डनम्। इति हेमचन्द्रः ॥

भद्रात्मजः, पुं, (भद्रः हितकर आत्मज इव रक्षाकरत्वात्।) खड्गः। इति त्रिकाण्डशेषः ॥

भद्रारकः पुं, अष्टादशक्षुद्रद्वीपान्तर्गतद्वीपविशेषः। इति शब्दमाला ॥

भद्रालपत्रिका, स्त्री, (भद्राय अलति पर्य्याप्नोतीति। अल्+अच्। भद्रालं पत्रं यस्याः। कप्। टाप्। अत इत्वम्।) गन्धाली। इति शब्दमाला ॥

भद्राली, स्त्री, (भद्र+अल्+अच्। भद्राल+गौरादित्वात् ङीष्।) गन्धाली। इति शब्दमाला ॥

भद्रावती, स्त्री, (भद्रमस्या अस्तीति। मतुप्। मस्य वः। संज्ञायां पूर्व्वपदस्य दीर्घः।) कट्फलवृक्षः। इति राजनिर्घण्टः ॥

भद्राश्रयः, पुं, (भद्रस्याश्रयः।) चन्दनम्। इति शब्दचन्द्रिका ॥

भद्राश्वं, क्ली, (भद्रा अश्वा अत्र।) भुवि जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषः। इति त्रिकाण्डशेषः ॥ तद्विवरणं यथा। माल्यवतः पूर्व्वपार्श्वे पूर्व्वगण्डिका एकत्रिंशद्योजनसहस्राणि मागन्तत्र च भद्राश्वा नाम जनपदाः भद्रशालवनञ्च तत्र चावस्थितं कालाम्रश्चाः पुरुषाः श्वेताः महावर्णिनः स्त्रियः कुमुदवर्णाः दशवर्षसहस्राणि च तेषामायुस्तत्र च पञ्च कुलपर्व्वताः तद्यथा, शैलवर्णः मालाख्यो वरजस्कः त्रिपर्णो नीलश्चेति तद्विनिर्गता बहवो नद्यस्तदम्भःस्थितानां देशानां तान्येव नामानि ते च देशाः एताः नदीः पिबन्ति। तद्यथा, सीता सुवाहिनी हंसवती कावेरी सुरचा शाखावती इन्द्रनदी अङ्गारवाहिनी हरितोया सोमावर्त्ता शतह्रदा वनमाला वसुमती हंसा पर्णा पञ्चगङ्गा धनुष्मती मणिवप्रा सुब्रह्मभागा विलासिनी कृष्णतोया पुण्योदा नागवती शिवा शैवालिनी मणितटा क्षीरोदा वरुणावती विष्णुपदी महानदी हिरण्यस्कन्धवाहा सुरावती वामोदा पताकाश्वेता महानद्यः एताश्च गङ्गासमाः कीर्त्तिताः आजन्मार्ज्जं पापं विनाशयन्ति क्षुद्रनद्यश्च कोटिशस्ताश्च नदीर्ये पिबन्ति ते दशवर्षसहस्रायुषः रुद्रोमाभक्ता इति। इति वाराहे भुवनकोषे रुद्रगीता ॥ अपि च। तथैवेलावृतमपरेण पूर्व्वेण च माल्यवद्गन्धमादनावानीलनिषधायतौ द्विसहस्रं पप्रथतुः केतुमालभद्राश्वयोः सीमानं विदधाते। मन्दरो मेरुमन्दरः सुपार्श्वः कुमुद इत्ययुतयोजनविस्तारोन्नाहा मेरोश्चतुर्द्दिशमवष्टम्भगिरय उपकॢप्ताः। चतुर्षु एतेषु चूतजम्बूकदम्बन्यग्रोधाश्चत्वारः पादपप्रवराः पर्व्वतकेतव इवाधिसहस्रयोजनोन्नाहास्तावद्विटपविततयः शतयोजनपरिणाहाः। ह्रदाश्चत्वारः पयोमध्विक्षुरसमृष्टजलाः यदुपस्पर्शिन उपदेवगणा योगैश्वर्य्याणि स्वाभाविकानि भरतर्षभ! धारयन्ति। देवोद्यानानि च भवन्ति चत्वारि नन्दनं चैत्ररथं वैभ्राजकं सर्व्वतोभद्रमिति। येष्वमरपरिवृढ़ाः सहसुरललनाललामयूथपतय उपदेवगणैरुपगीयमानमहिमानः किल विहरन्ति। मन्दरोत्सङ्ग एकादशशतयोजनोत्तुङ्गदेवचूतशिरसो गिरिशिखरस्थूलानि फलान्यमृतकल्पानि निपतन्ति। तेषां विशीर्य्यमाणानामतिमधुरसुरभिसुगन्धिबहुलारुणरसोदेनारुणोदा नाम नदी मन्दरगिरिशिखरान्निपतन्ती पूर्व्वेणेलावृतमुपप्लावयति। यदुपजोषणाद्भवान्या अनुचरीणां पुण्यजनवधूनामवयवस्पर्शसुगन्धिवातो दशयोजनं समन्तादनुवासयति। एवं जम्बूफलानामत्युच्चनिपातविशीर्णानामनस्थिप्रायाणामिभकायनिभानां रसेन जम्बूनदी नाम नदी मेरुमन्दरशिखरादयुतयोजनादवनितले निपतन्ती दक्षिणेनात्मानं यावदिलावृतमुपस्यन्दति। तावदुभयोरपि रोधसोर्या मृत्तिका तद्रसेनानुविध्यमाना वाय्वर्कसंयोगविपाकेन सदामरलोकाभरणं जाम्बूनदं नाम सुवर्णं भवति यदुह वाव विबुधादयः सह युवतिभिर्मुकुटकटककटिसूत्राद्याभरणरूपेण खलु धारयन्ति। यस्तु महाकदम्बः सुपार्श्वपार्श्वनिरूढ़स्तस्य कोटरेभ्यो विनिःसृताः पञ्चायामपरिणाहाः पञ्च मधुधाराः सुपार्श्वशिखरात् पतन्त्योऽपरेणात्मानमिलावृतमनुमोदयन्ति यो ह्युपयुञ्जानानां मुखनिर्व्वासितो वायुः समन्तात् शतयोजनमनुवासयति। एवं कुमुदनिरूढ़ो यः शतवल्शो नाम वटस्तस्य स्कन्धेभ्यो नीचीनाः पयोदधिमधुघृतगुड़ान्नाद्यम्बरशय्यासनाभरणादयः सर्व्व एव कामदुघा नदाः कुमुदाग्रात् पतन्तस्तमुत्तरेणेलावृतमुपयोजयन्ति यानुपजुषाणानां न कदाचिदपि प्रजानां वलीपलितक्लमस्वेददौर्गन्ध्यजरामयापमृत्युशीतोष्णवैवर्ण्योपसर्गादयस्तापविशेषा भवन्ति यावज्जीवं सुखं निरतिशयमेव कुरङ्गकुररकुसुम्भवैकङ्कत्रिकूटशिशिरपतङ्गरुचकनिषधशिनिवासकपिलशङ्खवैदूर्य्यजारुधिहंसऋषभनागकालञ्जरनारदादयो गिरयो मेरोः कर्णिकाया इव केशरभूता मूलदेशे परित उपकॢप्ताः। जठरदेवकूटौ मेरुं पूर्व्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रं पृथुतुङ्गौ भवतः एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतौ एवमुत्तरतस्त्रिशृङ्गमकरौ अष्टाभिरेतैः परिसृतोऽग्निरिव परितश्चकास्ति काञ्चनगिरिः। मेरोर्मूर्द्धनि भगवत आत्मयोनेर्मध्यत उपकॢप्तां पुरीमयुतयोजनसाहस्रीं समचतुरस्रां शातकौम्भीं वदन्ति तामनुपरितो लोकपालानामष्टानां यथादिशं यथारूपं तुरीयमानेन पुरोऽष्टावुपकॢप्ताः। इति श्रीभागवते ५ स्कन्धे भुवनकोषवर्णने १६ अध्यायः ॥

भद्रासनं, क्ली, (भद्राय लोकहिताय आसनम्।) नृपासनम्। इत्यमरः। २। ८। ३१ ॥ (योगिनामासनविशेषः। यथा, तन्त्रसारे।
“सीवन्याः पार्श्वयोर्न्यस्य गुल्फयुग्मं सुनिश्चलम्।
भद्रासनं समुद्दिष्टं योगिभिः परिकल्पितम् ॥”)

भद्रेश्वरः, पुं, (भद्रः शुभदश्चासावीश्वरश्चेति भद्रात्मकः मङ्गलमय ईश्वरो वेति।) कल्पग्रामस्थशिवः। यथा,—
“उत्तिष्ठ कान्त! गच्छावः कल्पग्रामं सुशोभनम्।
तया सार्द्धं जगामाथ कल्पग्रामं वसुन्धरे! ॥
भद्रेश्वरनिमित्तं हि द्रव्यञ्च कथितं शुभम्।
नित्यञ्च भुञ्जते यत्र पात्रद्वयं समर्पितम् ॥
दृष्ट्वा भद्रेश्वरं देवं चक्रतीर्थफलं लभेत्।
कल्पग्रामाच्छतगुणं चक्रतीर्थं वसुन्धरे! ॥”
इति वाराहे मथुरामाहात्म्ये चक्रतीर्थप्रभावो नामाध्यायः ॥

शिवप्रार्थं दुर्गाराधितहिमालयस्थपार्थिवशिवलिङ्गम्। यथा,—
“तवार्थाय ग्रहीष्यामि महर्षीन् हिमवद्गृहे।
यच्चेह रुद्रमीड्त्वा स्थापयश्चेश्वरः कृतः ॥
असौ भद्रेश्वरेत्येवं ख्यातिं लोके भविष्यति।
देवदानवगन्धर्व्वा यक्षकिम्पुरुषोरगाः ॥
पूजयिष्यन्ति सततं मानवाश्च शुभेप्सवः ॥”
इति वामनपुराणे ४६ अध्याये उमां प्रति शिववाक्यम् ॥ गङ्गायाः पश्चिमतीरे गरिष्ठाख्यग्रामस्योत्तरे पाषाणमयशिवलिङ्गविशेषो ग्रामविशेषश्च ॥

भद्रैला, स्त्री, (भद्रा एला।) स्थूलैला। इति राजनिर्घण्टः ॥ (अस्याः पर्य्यायो यथा,—
“एला स्थूला च बहुला पृथ्वीका त्रिपुटापि च।
भद्रैला बृहदेला च चन्द्रबाला च निष्कुटिः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

भद्रोदनी, स्त्री, (भद्रं उदनिति अनयेति। उत्+अन्+अच्। गौरादित्वात् ङीष्।) बला। नागबला। इति राजनिर्घण्टः ॥

(भनुज, ओ ध औ मोटने। इति कविकल्पद्रुमः ॥ रुधा०-पर०-सक०-अनिट्। ध, भनक्ति ॥)

भन्दिलं, क्ली, (भदि+इलच्।) शुभम्। इत्युणादिकोषः ॥ कम्पः। दूतः। इति संक्षिप्तसारोणादिवृत्तिः ॥

भनुभुकः, पुं, भारतवर्षान्तर्गतदेशविशेषः। यथा,
“तथाश्चत्वार उत्तापि ग्रामाणां भनुभुकाः
स्मृताः ॥”
इति स्कान्दे कुमारिकाखण्डे बर्क्करेश्वरमाहात्म्यनामाध्यायः ॥

भपञ्जरं, क्ली, (भानां नक्षत्राणां पञ्जरम्।) नक्षत्रचक्रम्। इति सिद्धान्तशिरोमणिः ॥